# gopAlAkShaya kavacham

# ગોપાલાક્ષયકવચમ્

## Document Information

Text title : gopAlAkShaya kavacham

File name : gopaalaakshayakavacha.itx

Category : kavacha, vishhnu, krishna, vishnu

Location : doc_vishhnu

Author : Traditional

Transliterated by : WebD

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Description-comments : brahmasa.nhitaa

Latest update : January 16, 2005

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# ગોપાલાક્ષયકવચમ્

શ્રી ગણેશાય નમઃ ।
શ્રીનારદ ઉવાચ ।
ઇન્દ્રાદ્યમરવર્ગેષુ બ્રહ્મન્યત્પરમાઽદ્ભુતમ્ ।
અક્ષયં કવચં નામ કથયસ્વ મમ પ્રભો ॥ ૧॥

યદ્ધૃત્વાઽઽકર્ણ્ય વીરસ્તુ ત્રૈલોક્ય વિજયી ભવેત્ ।
બ્રહ્મોવાચ ।
શ‍ૃણુ પુત્ર મુનિશ્રેષ્ઠ કવચં પરમાદ્ભુતમ્ ॥ ૨॥

ઇન્દ્રાદિદેવવૃન્દૈશ્ચ નારાયણમુખાચ્છ્રતમ્ ।
ત્રૈલોક્યવિજયસ્યાસ્ય કવચસ્ય પ્રજાપતિઃ ॥ ૩॥

ઋષિશ્છન્દો દેવતા ચ સદા નારાયણઃ પ્રભુઃ ।
અસ્ય શ્રીત્રૈલોક્યવિજયાક્ષયકવચસ્ય પ્રજાપતિઋર્ષિઃ,
અનુષ્ટુપ્છન્દઃ, શ્રીનારાયણઃ પરમાત્મા દેવતા,
ધર્માર્થકામમોક્ષાર્થે જપે વિનિયોગઃ ।
પાદૌ રક્ષતુ ગોવિન્દો જઙ્ઘે પાતુ જગત્પ્રભુઃ ॥ ૪॥

ઊરૂ દ્વૌ કેશવઃ પાતુ કટી દામોદરસ્તતઃ ।
વદનં શ્રીહરિઃ પાતુ નાડીદેશં ચ મેઽચ્યુતઃ ॥ ૫॥

વામપાર્શ્વં તથા વિષ્ણુર્દક્ષિણં ચ સુદર્શનઃ ।
બાહુમૂલે વાસુદેવો હૃદયં ચ જનાર્દનઃ ॥ ૬॥

કણ્ઠં પાતુ વરાહશ્ચ કૃષ્ણશ્ચ મુખમણ્ડલમ્ ।
કર્ણૌ મે માધવઃ પાતુ હૃષીકેશશ્ચ નાસિકે ॥ ૭॥

નેત્રે નારાયણઃ પાતુ લલાટં ગરુડધ્વજઃ ।
કપોલં કેશવઃ પાતુ ચક્રપાણિઃ શિરસ્તથા ॥ ૮॥

પ્રભાતે માધવઃ પાતુ મધ્યાહ્ને મધુસૂદનઃ ।

દિનાન્તે દૈત્યનાશશ્ચ રાત્રૌ રક્ષતુ ચન્દ્રમાઃ ॥ ૯॥

પૂર્વસ્યાં પુણ્ડરીકાક્ષો વાયવ્યાં ચ જનાર્દનઃ ।
ઇતિ તે કથિતં વત્સ સર્વમન્ત્રૌઘવિગ્રહમ્ ॥ ૧૦॥

તવ સ્નેહાન્મયાઽઽખ્યાતં ન વક્તવ્યં તુ કસ્યચિત્ ।
કવચં ધારયેદ્યસ્તુ સાધકો દક્ષિણે ભુજે ॥ ૧૧॥

દેવા મનુષ્યા ગન્ધર્વા યજ્ઞાસ્તસ્ય ન સંશયઃ ।
યોષિદ્વામભુજે ચૈવ પુરુષો દક્ષિણે ભુજે ॥ ૧૨॥

નિભૃયાત્કવચં પુણ્યં સર્વસિદ્ધિયુતો ભવેત્ ।
કણ્ઠે યો ધારયેદેતત્ કવચં મત્સ્વરૂપિણમ્ ॥ ૧૩॥

યુદ્ધે જયમવાપ્નોતિ દ્યૂતે વાદે ચ સાધકઃ ।
સર્વથા જયમાપ્નોતિ નિશ્ચિતં જન્મજન્મનિ ॥ ૧૪॥

અપુત્રો લભતે પુત્રં રોગનાશસ્તથા ભવેત્ ।
સર્વતાપપ્રમુક્તશ્ચ વિષ્ણુલોકં સ ગચ્છતિ ॥ ૧૫॥

॥ ઇતિ બ્રહ્મસંહિતોક્તં શ્રીગોપાલાક્ષયકવચં સમ્પૂર્ણમ્ ॥

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*gopAlAkShaya kavacham*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*